चोदात्तस्वरितपरत्वे श्रवणं स्पष्टम्” सि॰कौ॰। स्वरिताः शब्दाश्च पाणिनिना फिट्सूत्रेण च अनुशिष्टा यथा। “तित् स्वरितम्” पा॰ तकारेत् प्रत्ययः स्वरितः स्यात्। “बिल्वतिष्ययोः स्वरितो वा” फिट्सू॰ १पादः। “अनयोरन्तः स्वरितो वा पक्षे उदात्तः” सि॰ कौ॰। “उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य” पा॰ “उदात्तस्थाने स्वरितस्थाने च यो यण् ततः परस्यानुदात्तस्य स्वरितः स्यात्। अभ्यर्भि द्धि। स्वरितस्य यणः। खलप्व्याशा। अस्य स्वरितस्य त्रैपादिकत्वेनासिद्धत्वाच्छेषनिघातो न” सि॰कौ॰ “स्वरितो वाऽनुदात्ते पदादौ” पा॰ “अनुदात्ते पदादौ परे उदात्तेन सहैकादेशः स्वरितो वा स्यात्। पक्षे पूर्वसूत्रेणोदात्तः। वीदं ज्योतिर्हृदये। अस्य श्लोको दिवीयते। व्यवस्थितविभाषात्वादिकारयोः स्वरितः दीर्घप्रवेशे तूदात्तः। किञ्च एङः पदान्तादिति पूर्वरूपे स्वरित एव। तेऽवदन्। सोऽयमागात्। उक्तञ्च प्रातिशाख्ये “इकारयोश्च प्रश्लेषे क्षैप्राभिनिहतेषु चेति” सि॰कौ॰। “उदात्तादनुदात्तस्य स्वरितः” पा॰ “उदात्तात् परस्यानुदात्तस्य स्वरितः स्यात्। अग्निमीळे”। अस्याप्यसिद्धत्वाच्छेषनिघातो न। “तमीशानासः” सि॰कौ॰। “नोदात्तस्वरितपरोऽगार्ग्यकाश्यपगालवानाम्” पा॰ उदात्तपरः स्वरितपरश्चानुदात्तः स्वरितो न स्यात्। गार्ग्यादिमते तु स्यादेव। प्र य आरुः। क्व वोऽश्वाः ३। क्वा ३ भीशवः” सि॰कौ॰। “न्यङ्स्वरौ स्वरितौ” फि॰ “एतौ स्वरितौ। न्यङुत्तानः। व्यचक्षयत् स्वः” सि॰कौ॰। “न्यर्बुदव्यल्कशयोरादिः” फि॰। स्वरितः स्यात्। “तिल्यशिक्यकाश्मर्यधान्यकन्याराजन्यामनुष्याणामन्तः” फि॰। स्वरितः स्यात्। “तिलानां भवनं क्षेत्रं तिल्यम्। यतोऽनाव इति प्राप्ते” सि॰कौ॰। “बिल्वभक्ष्यवीर्याणि छन्दसि” फि॰४र्थपादः। “अन्तस्वरितानि” सि॰कौ॰। “स्वरितेनाधिकारः” पा॰ “स्वरितत्वयुक्तशब्दस्वरूपमधिकृतं बोध्यम्” सि॰कौ॰ “स्वरितेनेति इत्थंभावे तृतीया स्वरितत्वज्ञाप्योऽधिकार इत्यर्थः स्वरितत्वञ्च दोषविशेषजन्यसज्ञातृसाधारणाश्रयम् अधिक्रियमाणपदघटकाजाश्रितं वा बोध्यम्। तच्च तु नासिकस्वरवत् प्रतिज्ञयैव निर्णीयते अधिकारस्य कियद्दूरमित्यत्रापि बाधके व्याख्यानमेव शरणम्” शब्देन्दु॰। “स्वरितञितः आत्मनेपदं कर्त्रभिप्राये क्रियाफले” पा॰ स्वरितेतो ञितश्च धातोरात्मनेपदं स्यात् कर्त्रभिप्राये क्रियाफले” सि॰ कौ॰। स्वर-क्त। ४स्वरयुक्ते त्रि॰।

**स्वरु** पु॰ स्वृ-उ। १वज्रे अमरः २यूपखण्डे ३वाणे ४यज्ञे मेदि॰। ५सूर्य्यकिरणे ६वृश्चिकभेदे च उणा॰।

**स्वरुचि** त्रि॰ स्वस्यैव रुचिः प्रवर्त्तिका स्वक्रन्ये यस्य। १स्वतन्त्रे हेमच॰ ६त॰। २स्वस्याभिलाषे स्त्री।

**स्वरूप** न॰ स्वस्य रूपम्। १स्वभावे अमरः। स्वमेव रूपम्। २स्वात्मके पदार्थे। स्वं यथा स्वं रूपयति रूप-अण्। ३यथास्वरूपाभिज्ञे पण्डिते पु॰ अमरः। स्वेन स्वभावेनैव रूपमस्य। ४मनोज्ञे त्रि॰ अमरः।

**स्वरूपसंबन्ध** पु॰ स्वरूपं सम्बन्धः स्वरूपयोर्वा सम्बन्धः। न्यायोक्ते स्वात्मके सम्बन्धे षट्पदार्थातिरिक्ते पदार्थभेदे यथा प्रतियोगित्वम् विषयत्वमित्यादि।

**स्वरोदय** पु॰ स्वरणात् उदयो शुभादिज्ञापकतया यत्र। स्वरस्य श्वासविशेषस्य शुभाशुभत्वज्ञानसाधने तन्त्रशास्त्रभेदे चक्रशब्दे २८१०पृ॰दृश्यम्।

**स्वर्ग** पु॰ स्वरिति गीयते गै-क सु+ऋज-घञ् वा। १दुःखासम्भिन्ने सुखे २देवानामावासस्थाने च अमरः। स्वर्गकारणस्वरूपादिकं भा॰ व॰ २६० अ॰ उक्तं यथा “उपरिष्टाच्च स्वर्लोको योऽयं स्वरिति संज्ञितः। ऊर्द्ध्वगः सत्पथः शश्वद्देवयानचरो मुने!। नातप्ततपसः पुंसो नामहायज्ञयाजिनः। नानृता नास्तिकाश्चैव तत्र गच्छन्ति मुद्गल!। धर्मात्मानो जितात्मानः शान्ता दान्ता विमत्सराः। दानधर्मरताः लोकाः शूराश्चाहवलक्षणाः। तत्र गच्छन्ति धर्माग्र्यं कृत्वा शमदमात्मकम्। लोकान् पुण्यकृतान् ब्रह्मन्! सद्भिराचरितान्नृभिः। देवाः साध्यास्तथा विश्वे तथैव च महर्षयः। यामा धामाश्च मौद्गल्य! गन्धर्वाप्सरसस्तथा। एषां देवनिकायानां पृथक् पृथगनेकशः। भास्वन्तः कामसम्पन्ना लोकास्ते जोमयाः शुभाः। त्रयस्त्रिंशत्सहस्राणि योजनानि हिरण्मयः। मेरुः पर्वतराड् यत्र दिव्योद्यानानि मुद्गल!। नन्दनादीनि पुण्यानि विहाराः पुण्यकर्मणाम्। न क्षुत्पिपासे न ग्लानिर्न शीतोष्णे भयं तथा। बीभत्समशुभं वाऽपि तत्र किञ्चिन्न विद्यते। मनोज्ञाः सर्वतो गन्धाः सुखस्पर्शाश्च सर्वशः। शब्दाः श्रुतिमनोग्राह्याः सर्वतस्तत्र वै मुने!। न शोको न जरा तत्र नायासपरिदेवने। ईदृशः स मुने! लोकः स्वकर्मफलहेतुकः। सुकृतैस्तत्र पुरुषाः सम्भवन्त्यात्मकर्मभिः। तैजसानि शरीराणि भवन्त्यत्रोपपद्यताम्। कर्मजान्येव मौद्गल्य! न मातृपितृजान्युत। न संस्वेदो न दौर्गन्ध्यं पुरीषं मूत्रमेव